IJCRT.ORG ISSN : 2320-2882

INTERNATIONAL JOURNAL OF CREATIVE RESEARCH THOUGHTS (IJCRT)

An International Open Access, Peer-reviewed, Refereed Journal

# श्रीहर्षो महान् दार्शनिकः – एकमध्ययनम्

**Dr.Kadambini Padhy,**

**Lecturer in Vyakarana,**

**A.N. Sanskrit College,**

**Kendrapara.**

**1.उपक्रमः-**

महाकविना श्रीहर्षेण संस्कृतसाहित्यजगति स्वकीया प्रतिभा प्रकटिता, वितनिता च। खण्डनखण्डखाद्यनामकस्य दर्शनग्रन्थस्य रचयिता श्रीहर्षः नैषधमहाकाव्ये समानरूपेण दर्शनशास्त्रस्य दुर्दान्ततां, व्याकरणशास्त्रस्याप्रतिमं परिचयम्, कोशग्रन्थानां समभ्यासं, काव्यकलायाः प्रकृष्टां प्रौढिञ्च प्रस्तौति स्म। श्रीहर्षस्य नैषधीयचरितं दर्शं दर्शं भारवेरर्थगौरवस्य कथा, माघस्य गुणत्रयावधारणा च पाठकानां हृदयात् सहसा व्यपगता । महाकाव्यमिदमवलोक्य परिभाव्य च कश्चन निगदति यत्- **उदिते नैषधे काव्ये क्व माघः क्व च भारविः।**

**2. श्रीहर्षस्य दार्शनिकत्वम्**

श्रीहर्षः भारतीयदर्शनशास्त्रस्य महान् विद्वान् आसीत्। खण्डनखण्डखाद्यनामको ग्रन्थः अस्य प्रमाणं भवति। दार्शनिकजगति सः विशिष्टं स्थानं बिभर्ति। नैषधीयचरितेपि भारतीयास्तिकदर्शनस्य नास्तिकदर्शनस्य च विचारधारा प्रतिपदं प्रतिफलिता। सांख्य-योग-न्याय-वैशाषिक-मीमांसा-वेदान्त-बौद्ध-जैन-चार्वाकादिदर्शनानां सिद्धान्तो नैषधीयचरिते उपवर्णितः। काव्यमिदं दार्शनिकग्रन्थ इव प्रतिभाति। तस्य दार्शनिकत्वे कानिचित् उदाहरणानि समुपस्थाप्यन्ते।

**क .न्यायविषये** -

न्यायदर्शनस्य प्रसिद्धः सिद्धान्तः कार्यकारणवादः। तस्य वर्णनं श्रीहर्षेण विहितम्। उत्पत्तिधर्मकस्य द्रव्यस्य गुणाः कारणादुत्पद्यन्ते[1] इति न्यायसूत्रं विद्यते। अर्थात् कारणगुणाः कार्यगुणानारभन्ते इति सिद्धान्तस्य साक्षात् निदर्शनमासीत् दमयन्ती। तथा हि –

**कलसे निजहेतुदण्डजः किमु चक्रभ्रमकारितागुणः**

**स तदुच्चकुचौ भवन्प्रभाझरचक्रभ्रममातनोति यत्[2]।**

नलदमयन्त्योः मनरूपिपरमाणूनां संयोगेन कामदेवस्य रचनायाः कार्यं वैशेषिकदर्शनस्य सृष्टिसिद्धान्तमाश्रयति। यथा-

**अनोन्यसंगमवशादधुना विभातां**

**तस्यापि तेपि मनसी विकसद्विलासे**

**स्रष्टुं पुनर्मनसिजस्य तनुं प्रवृत्तमा-**

**दादिव द्व्यणुककृत्परमाणुयुग्मम्[3]।**

नैयायिकाः बहुशः घटः घटकारः[4] इति प्रयोगं कुर्वन्ति। किमर्थमेतादृशः प्रयोगो नैयायिकैः कृतः तस्य कारणं श्रीहर्षेण प्राप्तम्। तथा हि –

**एतत्कुचस्पर्धितया घटस्य ख्यातस्य शास्त्रेषु निदर्शनत्वम्**

**तस्माच्च शिल्पान्मणिकादिकारी प्रसिद्धनामाजनि कुम्भकारः[5]।**

अनुभवो द्विविधः। यथार्थः, अयथार्थश्च[6]। अस्य सिद्धान्तस्य संकेतो नैषधीयचरिते प्राप्यते। कलिः इन्द्रं कथयति यत् अयथार्थज्ञानेन यथा यथार्थज्ञानस्य तिरस्कृतिः नैव सम्भवति तथैव विनम्रदमयन्त्याः अनिष्टं कर्तुं त्वं न शक्नोसि[7]।

**ख.पूर्वमीमांसाविषये** –

श्रीहर्षः मीमांसक आसीत्। मीमांसायाः सिद्धान्तः तेन ज्ञातमासीत्। सरस्वत्याः वर्णनप्रसङ्गे मीमांसायाः उल्लेखः कृतः। मेमांसा सरस्वत्याः वस्त्रमासीत्। तदुक्तम्-

**ब्रह्मार्थकर्मार्थकवेद भेदा द्विधा विधाय स्थितमात्मदेहम्**

**वक्रे पराच्छादनचारु यस्या मीमांसया मांसलमूरुयुग्म्[8]।**

मीमांसादर्शने ज्ञानं स्वतः प्रमाणं[9] भवति। अमुं सिद्धान्तं समाश्रित्य श्रीहर्षेण श्लोको विरचितः। दमयन्त्याः प्रेमिको नलः हंसं प्रति निगदति यत् मम कल्याणाय भवन्तं प्रेषयामीति पिष्टपेषणं भवति। यतो हि सज्जनः स्वयं परोपकारी भवति। यथा ज्ञानं स्वयं प्रमाणं भवति। तदुक्तं तेन-

**अथवा भवतः प्रवर्तना न कथं पिष्टमियं पिनष्टि नः**

**स्वत एव सतां परार्थता ग्रहणानां हि यथा यथार्थता[10]।**

मीमांसकाः देवतायाः अप्रत्यक्षरूपं स्वीकुर्वन्ति । तेषां मतेन देवतायाः सूक्ष्मं रूपं जगति सर्वत्र विराजते। मन्त्रद्वारा तेषां निमन्त्रणं विधीयते। मन्त्रमयी देवता। परन्तु आचार्यशङ्करो मतमिदं न स्वीकरोति। श्रीहर्षोपि मीमांसकमतं न समर्थयति। तदुक्तं यथा-

**विश्वरूपकलनादुपपन्नं तस्य जैमिनिमुनित्वमुदीये**

**विग्रहं मखभुजामसहिष्णुव्यथता मदशनिं सनिनाय[11]।**

**ग.सांख्ययोगविषये-**

सांख्याः सत्कार्यवादिनः[12] सन्ति। कार्यकारणभावस्य वर्णनं तेन कृतम्। उत्पत्तेः पूर्वं कार्यस्य सत्ता यत्र विद्यते तत्कारणमेव कार्यरूपेण अभिव्यक्तं भवति। तदर्थं पञ्च हेतवः समुपस्थापिताः ईश्वरकृष्णेन। नैषधेपि अस्य संकेतः प्राप्यते।

**नास्ति जन्यजनकव्यतिभेदः सत्यमन्नजनितो जनदेहः**

**वीक्ष्य वः खलु तनूममृतादं दृङ्निमज्जनमुपैति सुधायाम्[13]।**

राजा नलो भिक्षुकरूपेण विद्यमानं शचिपतिं दृष्ट्वा अवोचत् यत् कार्यकारणयोः मध्ये नास्ति कश्चन विशेषो भेदः। व्यक्तेः शरीरमन्नोपन्नं भवति। अमृतभक्षणं भवन्तं शरीरं वीक्ष्य दृष्टिः अमृते निमग्ना भवति। अत्र अमृतं भवति कारणं, इन्द्रस्य शरीरं कार्यं भवति। अतः तं शरीरं वीक्ष्य अमृतदर्शनमिव समानमानन्दं समजनि।

स्वचित्तस्य प्रचारसंवेदनाच्च योगी चित्तं स्वशरीरात् निष्कृष्य शरीरान्तरेषु विक्षिपति। विषयेस्विन् नैषधीयचरिते श्रीहर्षो वर्णयति यत्-

**भवन्नद-श्यं प्रतिविम्बदेहव्यूहं वितन्वन्मणिकुट्टिमेषु**

**पुरं परस्य प्रविशन् वियोगियोगीव चित्रं स रराज राजा[14]।**

**घ.वेदान्तविषये** –

श्रीहर्षः वेदान्तशास्त्रे महान् पण्डित आसीत्। खण्डनखण्डखाद्यग्रन्थस्य प्रणेता श्रीहर्षः स्वकीये नैषधीयचरिते दार्शनिकतत्त्वं वर्णितमासीत्। ब्रह्साक्षात्कारो भवति वेदान्तस्य प्रधानं लक्ष्यम्। नैषधे ब्रह्मसाक्षात्कारस्य वर्णनं बहुत्र दृश्यते। तृतीयसर्गे ब्रह्मप्राप्तेः वर्णनं प्राप्यते। तथा हि-

**नेत्राणिवैदर्भसुतासखीनां विमुक्ततत्तविषयग्रहाणि**

**प्रापुस्तमेकं निरूपाख्यरूपं ब्रह्मेव चेतांसियतव्रतानाम्**[15]**।**

अनेन श्लोकेन अनिर्वचनीयेन ब्रह्मणा साकं हंसस्य तुलना विहिता। ब्रह्मानन्दप्राप्तेरपि संकेतः प्रदत्तः। विदर्भराज्ञः सुतायाः सखीनां नेत्राणि दृश्यमानं वस्तु परित्यज्य वर्णनातीतं सौन्दर्यवन्तं हंसं सादरेणाद्राक्षुः। यथा यतव्रतानां योगिनां चेतांसि एकमद्वितीयं निरूपाक्षरूपं ब्रह्म प्रापुः।

महर्षिः नारदः अनन्ताकाशं व्यतीत्य इन्द्रभवनं जगाम। यथा योगी अनादिरूपं संसाराब्धिं संप्रतीर्य परमानन्दं सुन्दरं ब्रह्म प्राप्नोतीति नैषधे वर्णितमस्ति। यथा -

**स व्यतीत्य वियदन्तरगाधं नाकनायकनिकेतनमाप**

**सम्प्रतीर्य भवसिन्धुमनादिं ब्रह्मशर्मभरचारु यतीव**[16]**।**

सांसारिकदशा मिथ्या भवति। तथापि तस्याः अनीर्वचनीयत्वं विद्यते। अस्यामपि दशायां मनुष्यः आनन्दमयो भवति। भ्रान्तितः मुक्तदशा मोक्ष इत्युच्यते। विषयेस्मिन्श्रीहर्षो निगदति यत्-

**तत्कालमानन्दमयो भवन्ती भवत्तरानिर्वचनीयमोहाः**

**सा मुक्तसंसारिदशारसाम्यां द्विस्वादमुल्लासमभुङ्क मृष्टम्**[17]**।**

यदा दमयन्ती नलं दृष्टवती सा लोकत्तरानन्दं प्रप्तवती। संसारमुक्तयोगिनां कृते परमानन्दो यथा भवति तथैव दमयन्ती आनन्दमग्ना संजाता।

**ङ .बौद्धदर्शनविषये-**

बौद्धदर्शनस्य सिद्धान्तोपि नैषधे प्राप्यते। सरस्वत्याः उदरवर्णनप्रसंगे बौद्धदर्शनस्य शून्यवादस्य वर्णनं दृश्यते। यथा-

**या सोमसिद्धान्तमयाननेव शून्यात्मतावादमयोदरेव**

**विज्ञानसेमस्त्यमयान्तरेव सोकोरतासिद्धिमयाखिलेव**[18]**।**

सोमसिद्धान्तमाश्रित्य सरस्वत्याः मुखस्य, बौद्धदर्शनस्य शून्यवादमाश्रित्य उदरस्य , विज्ञानवादमाश्रित्य चित्तस्य, सौत्रान्तिकसाकारविज्ञानवादमाश्रित्य सुन्दररूपस्य च वर्णनं कृतम्।

**च. जैनदर्शनविषये-**

जैनदर्शनस्याभासो नैषधे दृश्यते। जैनदर्शने सम्यक्दर्शनम्, सम्यक्ज्ञानम्, सम्यक्चरित्रं मोक्ष इत्युच्यते। एतत् त्रिरत्नपदेनाभिधीयते। एतद्विषये नैषधे उल्लेखः प्राप्यते। यथा-

**न्यवेशि रत्नत्रितये जिनेनयः स धर्मचिन्तामणिरुज्झिता यया**

**कपालिकोपोनलभस्मनः कृते तदेव भस्मस्वकुले स्मृतं तया** [19]**।**

यो धर्माख्यः चिन्तामणिः देवेन अर्हता रत्नत्रये निवेशितः, स धर्मचिन्तामणिः यया स्त्रिया कामस्य कृते त्यक्तः तया स्त्रिया तदेव स्वकुले विस्मृतम्। कामाख्यभस्मान्धतया चरित्रत्यागिन्या स्त्रिया स्वकुलमेव भस्मसात् कृतम्। अतो नलैकव्रताया ममाग्रे महेन्द्रादिनामग्रहणमपि न कार्यमिति दमयन्ती कथयति।

विहारभूमिः भगवतो महावीरस्य जन्मस्थानम्। अतः अत्यन्तं पवित्रमिति जैनदर्शनश्रद्धालव आमनन्ति। बौद्धाः स्वकर्मानुष्ठाने प्रायेण कुण्डलानि कुर्वन्ति। एतद् वीक्ष्य श्रीहर्षो वर्णयति यत्-

**चमूचरास्तस्य नृपस्य सादिनो जिनोक्तिषु श्राद्धनयेव सैन्धवाः**

**विहारदेशं तमवाप्य मण्डलीमकारयन् भूरितुरङ्गमानपि [20]।**

नृपस्य सेनाचराः अश्वाः जैनदर्शनश्रद्धालुतया इव तं विहारप्रदेशं सञ्चारभूमिं सुगतालयञ्च अवाप्य तुरङ्गमान् मण्डलाकारं च अकारयत्।

**छ.चार्वाक्दर्शनविषये-**

चार्वाक्दर्शनस्य सिद्धान्तानां समुल्लेखो नैषधीयचरितस्य सप्तदशसर्गे कृतः श्रीहर्षेण। **यावज्जीवेत् सुखं जीवेत्, ऋणं कृत्वा घृतं पिवेत्** इति चार्वाक्दर्शनं निगदति। अयमेव विषयो नैषधे वर्णितः। यथा-

**कः शमः क्रियतां प्राज्ञाः प्रियाप्रीतौ परिश्रमः**

**भस्मीभूतस्य देहस्य पुनरागमनं कुतः[21]।**

यज्ञद्वारा स्वर्गप्राप्तिर्न सम्भवति यथा जले पाषाणखण्डस्य उन्मज्जनं न भवति। तद् यथा-

**ग्रावोन्मज्जनवद्यज्ञफलेपि श्रुतिसत्यता**

**का श्रद्धा तत्र धीवृद्धाः कामाध्वा यत्खलीकृतः[22]।**

चार्वाक्दर्शनानुसारेण अग्निहोत्रविधानम्, दण्डधारणम्, भस्मादिलेपनं न करणीयम्। एते सर्वे बुद्धिहीनस्य दरिद्रस्य व्यापारा भवन्ति। यथा-

**अग्निहोत्रमयो वेदास्त्रिदण्डं भस्मगुण्ठनम्**

**बुद्धिपौरुषहीनानां जीविकेति वृहस्पतिः[23]।**

श्रीहर्षेणापि नैषधे एतदपि भणितम्। यथा-

**अग्निहोत्रं त्रयी तन्त्रं त्रिदण्डं भस्मपुण्डकम्**

**प्रज्ञापौरुषनिःस्वानां जीवो जन्मनि जीविका[24]।**

अनेन प्रकारेण चार्वाक्दर्शनस्य प्रभावो नैषधीयचरिते निपतति।

**3. उपसंहारः-**

उपर्युक्तैः प्रमाणैः ज्ञायते यत् महाकविः श्रीहर्षो महान् दार्शनिक आसीत्। सर्वेषु दर्शनेषु तस्याप्रतिहता गतिरासीत्।। श्रीहर्षस्य उक्तिरियं नितान्तं तस्य वैदुष्यं दार्शनिकत्वञ्च प्रतिपादयति। तथा हि –

**साहित्ये सुकुमारवस्तुनि दृढन्यायग्रहग्रन्थिले**

**तर्के वा मयि संविधातरि समं लीलायते भारती**

**शय्या वास्तुमृदूत्तरच्छदवती दर्भाङ्कुरैरास्मृता**

**भूमिर्वा हृदयङ्गमो यदि पतिस्तुल्या रतिर्योषिताम्।**

**पादटिप्पनी**

1. न्याय.सूत्रम् 3.9.5
2. नैषधीयचरितम् – 2/32
3. नैषधीयचरितम्- 3/135
4. घटादिषु प्रलीनेषु घटकाशादयो यथा आकाशे सम्प्रतीयन्ते नतद्वज्जीवा इहात्मनि – गौ.का 5/3
5. नैषधः- 7/25
6. सः द्विविधः। यथार्थः, अयर्थाश्च। तद्वतितत्प्रकारकोनुभवः यथार्थः। तदभाववति तत्प्रकारकोनुभवोय़थार्थः -तर्कसंग्रहः
7. नैषधः – 7/145
8. नैषधः- 10/80
9. स्वतः स्वप्रमाणानां प्रभाव्यमिति गम्यताम्।
   न हि स्वतोसती शक्तिः कर्तुमन्येन शक्यते। श्लोको.वा. 7/145
10. नैषधः- 2/61
11. नैषधः – 5/39
12. सांख्यकारिका –9
13. नैषधः – 5/94
14. नैषधः – 6/46
15. नैषधः – 3/3
16. नैषधः – 5/8
17. नैषधः – 8/15
18. नैषधः – 10/88
19. नैषधः – 9/31
20. नैषधः – 1/71

21 नैषधः – 17/69

22 नैषधः –17/37

23 सर्वदर्शनसंग्रहः – पृ. 13

24 नैषधः – 17/39